S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



**Embark,** *v. t.* नौकायां नि-प्र-विश् c. or निधा 3 U. -*v. i.* नावं or पोतं-आ-अधि-रुह् 1 P, or प्राविश् 6 P. **2** व्या-पृ 6 A, अभियुज् pass. ( with loc. ) ; प्रारभ् 1 A ( with acc. ). **-ation,** *s.* नौकारोहणं-रोपणं-प्रवेशनं. **2** व्यापारः, अभियोगः, प्रारंभः, उपक्रमः.

**Embarrass,** *v. t.* आकुलयति (D.). वि-व्या-मुह् c., व्यग्रीकृ 8 U. संभ्रम् c. ( भ्रमयति ), आकुलीकृ; 'I am really e. ed' सत्यमाकुलीभूतोस्मि ( S. 2 ). **2** बाध् 1 A, क्लिश् 9 P, उपरुध् 7 U, अभिभू. **-ed,** *a.* आ-व्याकुल, व्यग्र, मोहित, संभ्रांत, मूढ. **2** बाधित, उपरुद्ध; क्लिष्ट, अभिभूत; 'in e. circumstances' आपद्गत, दुःस्थ, कृच्छ्रगत, दुर्गत; 'e. smile' विलक्षस्मित. **-ment,** *s.* व्याकुलता, व्यग्रता. संभ्रमः, व्यामोहः, आकुलत्वं, क्लेशः, बाधः-धा, दुःखं, उपरोधः.

**Embassy,** *s.* दौत्यं, दूतधर्मः-क्रिया; 'sent on an e.' दूतः, दौत्येन प्रस्थापितः,

**Embattle,** *v. t.* व्यूह् 1 U or c., व्यूहेन रच् 10 or सज्जीकृ 8 U or व्यव-स्था (स्थापयति), व्यूहरचनां कृ. **-ed,** *a.* सन्नद्ध, सज्जीकृत, व्यूहेन रचित.

**Embedded,** *a.* निहित, निविष्ट, न्यस्त.

**Embellish,** *v. t.* भूष् 10. अलंकृ 8 U, मंड् 10, शुभ् c., भ्राज् c., परिष्कृ, प्रसाध् c. **-ment,** *s.* प्रसाधनं, भूषणं; *See* **Ornament. 2** नेपथ्यं, आहार्यं, वेशः, आकल्पः.

**Embers,** *s.* भासितं, भस्मन् *n.*: अंगारशेषं; अंगारोच्छिष्टं.

**Embezzle,** *v. t.* छलेन आत्मसात्कृ 8 U, स्वकीयं कृत्वा उप-विनि-युज् 7 A, 10; ग्रस् 1 A. **-ment,** *s.* छलेन अपहारः or उपयोगः or आत्मसात्करणं, ग्रसनं; अप-नि-ह्नवः.

**Embitter,** *v. t.* तिक्तीकृ 8 U. **2** प्रकुप् c., उद्-दीप् c., कुलषीकृ. **3** क्लिश् 9 P. दु 5 P.

**Emblazon,** *v. t.* विभूष् 10, मंड् 10.

**Emblem,** *s.* लक्षणं, लांछनं, केतनं, केतुः, व्यंजनं, संज्ञा, ध्वजः, चिह्नं, लिंगं, पताका. **-atic, -atical** *a.* लाक्षणिक (की *f.*). व्यंजक, बोधक, लिंगिन्, सूचक, द्योतक.

**Embody,** *v. t.* सशरीर *a.* कृ 8 U, शरीरेण युज् 10 or सनाथीकृ. **2** संग्रह् 9 P, समाहृ 1 P. एकी-एकत्र-कृ. **-ed,** *a.* मूर्त, शरीरबद्ध, देहवत्, मूर्तिमत्, शरीरिन्; 'the e. spirit' शरीराभिमानी आत्मा. **-ment,** *s.* शरीरिता, देहवत्त्वं, मूर्तिमत्ता. **2** मूर्ति *f.*. करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथा ( U. 3 ) 'the e. of pathetic sentiment &c.' **3** संग्रहः, सन्निपातः, समाहारः, एकीकरणं.

**Embolden,** *v. t.* प्रोत्सह् c.. आश्वस् c., निर्भय *a.* कृ.

**Embosom,** *v. t.* क्रोडीकृ 8 U. **2** श्लिष् 4 P. **3** परिवेष्ट् 10.

**Emboss,** *v. t.* गंडाकारेण परिष्कृ 8 U or उपशुभ् c.

**Embouchure,** *s.* मुखं ( of a river or a wind instrument ).

**Embow,** *v. t.* भुज् 6 P; *See* **Bend.**

**Embowel,** *v. t.* अंत्राणि अपनी or निर्हृ 1 P.

**Embowered,** *a.* कुंजसनाथ, निकुंजित.

**Embrace,** *v. t.* आलिंग् 1 P, आश्लिष् 4 P; परि-, ष्वंज् 1 A, उपगुह् 1 U; *See* **Clasp. 2** स्वी-अंगी-कृ 8 U; ग्रह् 9 P, आदा 3 A, अभ्युपगम् 1 P. **3** परिग्रह्, व्याप् 5 P, प्रतिसंहृ 1 P, समाविश् c. **4** परिवृ 5 U, परिवेष्ट् 1 A or c. -*s.* सं-आ-श्लेषः, आलिंगनं, परिरंभः, उपगूहनं, परिष्वंगः.

**Embrasure,** *s.* प्राकारच्छिद्रं, जालकं.

**Embrocate,** *v. t.* ( औषधीयजलेन ) लिप् 6 P, अंज् 7 P; मृद् 9 P, घृष् 1 P. संवह् c. **-ion,** *s.* मर्दनं, लेपनं, संवाहनं. **2** विलेपः-पनं, उपदेहद्रव्यं.

**Embroglio,** *s.* कलहकारणं. **2** वैरं, विरोधः. **3** वैमत्यं.

**Embroider,** *v. t.* सूच्या पुष्पादिकं सिव् 4 P or चित्र् 10, कार्मिकवस्त्रं कृ 8 U; 'an e. ed cloth' चित्रितं-कार्मिकं-वस्त्रं. **-er,** *s.* कार्मिकवस्त्रकृत् *m.*, सूचिकर्मोपजीविन् *m.* **-y,** *s.* सूचिकर्मन् *n.*, शिल्पं.

**Embroil,** *v. t.* संक्षुभ् c., आकुलीकृ 8 U, संकॄ 6 P, संकुलीकृ; विरागं उत्पद् c. **-ment,** *s.* संक्षोभः, सांकर्यं, संभ्रमः, आकुलत्वं.

**Embryo, Embryone,** *s.* गर्भः, भ्रूणः; 'in e.' गर्भच्छन्न, गर्भावस्थायां वर्तमान; ( fig. ) अपरिणत, अपरिपक्व. **2** आ-प्रा-रंभः; उपक्रमः.

**Emend,** *See* **Amend. -ator,** *s.* शोधकः, समाधातृ *m.*

**Emerald,** *s.* मरकतं, गारुत्मतं, अश्मगर्भः, हरिन्मणिः; 'e.-like' मारकत ( ती *f.* ), मरकतसदृश ( शी *f.* )

**Emerge,** *v. i.* ( सलिलात् ) उन्मस्ज् उत्था 1 P, निर्गम्-निःसृ 1 P; त्यज् 1 P. **2** आविर्भू 2 P, उदि 2 P, निर्भा 1 P, दृष्टिगोचर *a.* भू, दृश् pass., प्रकाशतां गम् &c., **-ence, -cy,** *s.* संकटं, विपत्समयः, आपद् *f.*, आकस्मिकसंभवः. **2** अवसरः, प्रस्तावः, प्रयोजनं, आवश्यकत्वं; 'according to e.' यथाप्रयोजनं, यथावसरं, प्रसंगवशात्. **-ent,** *a.* उन्मज्जत् **2** आकस्मिक ( की *f.* ), अकस्मादुद्भूत, अत्यावश्यक ( की *f.* ), अपरिहार्य. **-Emersion,** *s.* उत्थानं, उन्मज्जनं; त्यागः. **2** आविर्भावः, उदयः, &c.

**Emery,** *s.* उत्तमलोहं.

**Emetic,** *s.* वमनं, वांतिकृद् औषधं. **-a., -al,** *a.* वांतिकर ( री *f.* ).

**Emeute,** *s.* संमर्दः, तुमुलं-लः, कोलाहलः, विप्लवः.

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007